**दिनाङ्कः- 17.05.2024**
**प्रातः- 06:55**

## अथ वार्ताः

### प्रधानमंत्री-उत्तरप्रदेश-नैर्वाचनिकसभाः

लोकसभानिर्वाचनस्य अवशिष्टचरणानां कृते प्रचाराभियानं सजवं प्रवर्तते। विभिन्नराजनैतिकदलानां नेतारः स्वपक्षे समर्थनाय राज्यानाम् यात्रां नैरन्तर्येण कुर्वन्ति। विभिन्नराजनैतिकदलानां शीर्ष प्रचारकाः उत्तरप्रदेशे अग्रिमचरणस्य निर्वाचनाय मतदार्तॄन् आक्रष्टुम् सर्वविधप्रयासान् विदधति। प्रधानमन्त्री तथा भाजपायाः-वरिष्ठनेता नरेन्द्रमोदी ह्यः अवदत् यत् नागरिकता संशोधानाधिनियमः मोदीकी-गारण्टी-इत्यस्य प्रमुखोदाहरणम् अस्ति, एतेन स्पष्टं जायते यत् भाजपा स्वप्रतिज्ञां पूरयति। सः अवदत् यत् सीएए इत्यस्य निरसनं न भविष्यति। उत्तरप्रदेशस्य जौनपुरमण्डले निर्वाचनसभां सम्बोधयन् सः अवदत् यत् एतत् लोकसभानिर्वाचनं देशस्य कृते एतादृशं नेतारं चिनोतुम् अवसरः अस्ति यः सशक्तं सर्वकारं चालयितुं शक्नोति येन विश्वं भारतस्य सामर्थ्यस्य विषये ज्ञानं भवेत्। सः अवदत्, पूर्वं विकासः बृहन्नगरेषु एव सीमितः आसीत्, परन्तु अधुना अयोध्या, काशी इत्यादिषु स्थानेषु अपि बहुविकासः अभवत्। राज्यस्य आजमगढ-भदोही-प्रतापगढ-मण्डलेषु राजनैतिकसभाम् अपि सम्बोधितवान् । अपरपक्षे काङ्ग्रेसदलस्य महासचिवः प्रियङ्का गान्धी वाड्रा रायबरेलीनगरे प्रचारं कृतवती । भाजपायाः उपरि आक्षेपम् कुर्वन्ती सा अवदत् यत् भगवा-दलम् अराजकतां संवर्धयति।

### सर्वकारः-औषधयः

एकचत्वारिंशत् सामान्यतया प्रयुक्तानां औषधीनां, मधुमेह-हृदय-यकृत्-रोगाणां चिकित्सायाम् उपयुज्यमानानाम् षट्-सूत्राणां च मूल्यं सर्वकारेण न्यूनीकृतम् अस्ति। आवश्यकौषधीनां व्ययः सामान्यजनानां कृते न्यूनं एव भवेत् इति राष्ट्रियौषधमूल्यनिर्धारणप्राधिकरणस्य सभायां एषः निर्णयः स्वीकृतः।
फार्माउद्यमेभ्यः निर्देशः प्रदत्तः यत् ते विभिन्नानां औषधीनां न्यूनीकृतमूल्यानां सूचनां तत्क्षणं प्रभावीरूपेण विक्रेतृभ्यः, संग्रह कर्तृभ्यः च प्रसारयन्तु।

### भारत - ग्रीनहाइड्रोजन

नवीकरणीय ऊर्जासचिवः भूपिन्द्रसिंहभल्लाः वैश्विकहाइड्रोजन अर्थव्यवस्थायां महत्त्वपूर्णां भूमिकां निर्व्योढूम् देशस्य दृढनिश्चयं बोधितवान्। नीदरलैण्ड्देशस्य रॉटरडैम्-नगरे चतुर्विंशत्यधिक द्विसहस्रतमं विश्वहाइड्रोजन-शिखरसम्मेलनं सम्बोधयन् सः प्रतिनिधिभ्यः हरित-हाइड्रोजनेत्यस्य उत्पादनस्य कस्यापि परिमाणस्य पूर्तये भारतस्य क्षमतायाः आश्वासनं प्रदत्तवान्। सचिवेन उक्तं यत् देशस्य स्थायि ऊर्जास्रोतांसि प्रति संक्रमणस्य प्रतिबद्धतायाः अनुरूपं त्रयोविंशत्यधिकद्विसहस्र तमवर्षपर्यन्तं जीवाश्म-इन्धन-स्रोताभ्यां स्थापिता विद्युत्-क्षमता पञ्चाशत् प्रतिशतं वर्धते इति अनुमानितम् अस्ति।

### ऋतुविज्ञानम्

भारतीयऋतुविज्ञानविभागेन उत्तर-पश्चिमीय-भारते बिहारे च आगामि-पञ्चदिवसेषु तापतरङ्गस्य स्थितेः संभावना प्रकटिता। विभागेन उक्तं यत् अस्य मासस्य विंशतिः दिनाङ्कपर्यन्तं पश्चिमराजस्थाने, पञ्जाबे, हरियाणायां, दिल्ल्यां केषुचित् भागेषु च तीव्र-तापतरङ्गस्य सम्भावना वर्तते। पूर्व-मध्य-भारते अपि अस्य मासस्य अष्टादश दिनाङ्कात् उष्णतरङ्गस्य स्थितिः भवितुं शक्यते। ऋतुविभागेन अस्य मासस्य द्वाविंशतिः दिनाङ्कपर्यन्तं भारतस्य दक्षिणभागेषु प्रचण्डवृष्ट्याः पूर्वानुमानं कृतम् अस्ति।

**टॉप-स्क्वाश**

युवविषयकक्रीडामन्त्रालयस्य च मिशन ओलम्पिकसेल् एम ओ सी इत्यनेन स्क्वैशक्रीडकान् अनाहतसिंहं, अभयसिंहं, वेलावनसेन्थिलकुमारं च टार्गेट ओलम्पिकपोडियमयोजनायाः टॉप्स विकाससमूहे संयोजितम्। स्क्वैश-क्रीडकाः अष्टाविंशत्यधिक द्विसहस्र तमे वर्षे लॉस-एन्जलिस-ओलम्पिक-क्रीडायां केन्द्रीकृत्य -टॉप्स इत्यस्मिन् प्रवेशं प्राप्तवन्तः।

**।। इति वार्ता: ।।**